## गाङ् लिटि । (४९/२४५९)

[1]गाङ आदेशो भवति इङो लिटि परतः । अधिजगे, अधिजगाते, अधिजगिरे । [2]गाङोऽनुबन्धग्रहणं [3]विशेषणार्थम्, 'गाङकुटादिभ्योऽञ्णिन्ङित्' (१.२.१/२४६१) [4]इत्यत्रास्य ग्रहणं यथा स्यात्[5] । न हि [6]स्थानिवद्भावेन गाङ इति रूपं लभ्यते ॥

## विभाषा लुङ्लृङोः । (५०/२४६०)

लुङि लृङि च परत इङो विभाषा गाङ आदेशो भवति । आदेशपक्षे 'गाङ कुटादिभ्योऽञ्णिन्ङित्' (१.२.१/२४६१) इति ङित्त्वम्, 'घुमास्थागापाजहातिसां हलि' (६.४.६६/२४६२) इति ईत्वम् । अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत । न च भवति । अध्यैष्ट, अध्यैषाताम्, अध्यैषत । लृङि खल्वपि – अध्यगीष्यत, अध्यगीष्येताम्, अध्यगीष्यन्त । न च भवति । अध्यैष्यत, अध्यैष्येताम्, अध्यैष्यन्त ॥

## णौ च संश्चङोः (५१/२६०१)

इङो गाङ विभाषा इति वर्तते । णौ इति इङपेक्षया परसप्तमी, संश्चङोः इति च [7]ण्यपेक्षया । णौ सन्परे चङ्परे च परतः इङो विभाषा [8]गाङादेशो भवति । अधिजिगापयिषति । [9]न च भवति । अध्यापिपयिषति । चङि खल्वपि – अध्यजीगपत् । [10]न च भवति । अध्यापिपत् ॥

## अस्तेर्भूः । (५२/२४७०)

अस्तेर्धातोर्भूः इत्ययमादेशो भवति आर्धधातुके[11] । भविता । भवितुम् । भवितव्यम्[12] । इह कस्मान् न भवति, ईहामास, [13]ईहामासतुः, ईहामासुः ? 'कृञ्चानुप्रयुज्यते लिटि' (३.१.४०/२२३९) इति [14]प्रत्याहारग्रहणेनास्तेर्ग्रहणसामर्थ्यात् । तथा [15]चोच्यते –

अनुप्रयोगे तु भुवाऽस्त्यबाधनं
स्मरन्ति [16]कर्तुर्वचनान्मनीषिणः ।

[17]इति ॥

## ब्रुवो वचिः । (५३/२४५३)

ब्रुवो वचिरादेशो भवति [18]आर्धधातुकविषये । इकार उच्चारणार्थः । वक्ता । वक्तुम् । वक्तव्यम् । स्थानिवद्भावेन कर्त्रभिप्राय[19]क्रियाफलविवक्षायामात्मनेपदं भवति । ऊचे । वक्ष्यते[20] ॥

---

1. इङो गाङ आदेशः क. इ. 2. गाङनुबन्धग्रहणं ब, गाङ इत्यनुबन्धकरणं क. इ, गाङ इत्यनुकरणं ह. 3. विशेषणार्थम् नास्ति ह. 4. अत्र नास्ति क. फ. ह, इत्यत्र गाङ इति ब. 5. इह न भवति अगासीन्नट इति इत्यधिकम् ह. 6. स्थानिवद्भावात् क. 7. णिजपेक्षया इ. 8. गाङ इत्ययमादेशः ह. 9. गाङादेशो नास्ति क. इ. ह. 10. न च भवति नास्ति ह. 11. परतः इत्यधिकम् ह. 12. आर्धधातुके इति किम् ? अस्ति स्तः सन्ति इत्यधिकम् अ. 13. ईहामासतुः, ईहामासुः नास्ति ब. फ. ह. 14. प्रत्याहारेण ब. ह. 15. च नास्ति क. 16. कर्तुर्वचनम् अ. ब. फ. 17. इति नास्ति क. 18. आर्धधातुके विषये फ, आर्धधातुके ब. इ. 19. °क्रियाफले आत्मनेपदं फ. 20. इति इत्यधिकम् ग.